

Pranav Ganesh Mandir
Chinmaya Vibhooti

# SHRI GANESH CHATURTHI UTSAV 2020

This booklet contains pictures of Ganesh Bhagawan murtis at various Chinmaya Mission centres worldwide

ॐ

# गणपति अथर्वशीर्ष उपनिषद्

## *Gaṇapati Atharvaśīrṣa Upaniṣad*

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाग्ं सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शान्तिः शान्तिः शान्तिः ।

*om bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ, bhadraṁ paśyemākṣabhiryajatrāḥ, sthirairaṅgaistuṣṭuvāgṁ sastanūbhiḥ, vyaśema devahitaṁ yadāyuḥ, svasti na indro vṛddhaśravāḥ, svasti naḥ pūṣā viśvavedāḥ, svasti nastārkṣyo ariṣṭanemiḥ svasti no bṛhaspatirdadhātu, om śāntiḥ śāntiḥ śāntiḥ.*



Sandeepany Sadhanalaya
Powai
Mumbai

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं
कर्ताऽसि । त्वमेव केवलं धर्ताऽसि । त्वमेव केवलं हर्ताऽसि ।
त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्माऽसि नित्यम् ॥

*om namaste gaṇapataye, tvameva pratyakṣaṁ
tattvamasi, tvameva kevalaṁ kartā'si, tvameva
kevalaṁ dhartā'si, tvameva kevalaṁ hartā'si,
tvameva sarvaṁ khalvidaṁ brahmāsi,
tvaṁ sākṣādātmā'si nityam. (1)*

ऋतं वच्मि । सत्यंवच्मि ॥२॥

*ṛtaṁ vacmi, satyaṁvacmi. (2)*

अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्।
अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव
पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्।
अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्॥ ३ ॥

*ava tvaṁ mām, ava vaktāram, ava śrotāram, ava dātāram, ava dhātāram, avānūcānamava śiṣyam, ava paścāttāt, ava purastāt, avottarāttāt, ava dakṣiṇāttāt, avacordhvāttāt, avādharāttāt, sarvato māṁ pāhi pāhi samantāt.* (3)

त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं
सच्चिदानन्दाऽद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो
विज्ञानमयोऽसि॥ ४ ॥

*tvaṁ vāṅgmayastvaṁ cinmayaḥ,*
*tvamānandamayastvaṁ brahmamayaḥ,*
*tvaṁ saccidānandā'dvitīyo'si,*
*tvaṁ pratyakṣaṁ brahmāsi,*
*tvaṁ jñānamayo vijñānamayo'si.* (4)

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं
जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं
भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥ ५ ॥

*sarvaṁ jagadidaṁ tvatto jāyate, sarvaṁ jagadidaṁ
tvattastiṣṭhati, sarvaṁ jagadidaṁ tvayi
layameṣyati, sarvaṁ jagadidaṁ tvayi pratyeti,
tvaṁ bhūmirāpo´nalo´nilo nabhaḥ.
tvaṁ catvāri vākpadāni. (5)*

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः । त्वं देहत्रयातीतः ।
त्वं कालत्रयातीतः ॥ ६ ॥

*tvaṁ guṇatrayātītaḥ, tvaṁ avasthātrayātītaḥ,
tvaṁ dehatrayātītaḥ, tvaṁ kālatrayātītaḥ. (6)*

त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः ।
त्वां योगिनो ध्यायन्ति नित्यम् ॥ ७ ॥

*tvaṁ mūlādhārasthito´si nityam,
tvaṁ śaktitrayātmakaḥ,
tvāṁ yogino dhyāyanti nityam. (7)*

त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं
वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ ८ ॥

*tvaṁ brahmā tvaṁ viṣṇustvaṁ*
*rudrastvamindrastvamagnistvaṁ*
*vāyustvaṁ sūryastvaṁ candramāstvaṁ*
*brahma bhūrbhuvaḥ svarom. (8)*

गणादिं पूर्वमुच्चार्य वर्णादींस्तदनन्तरम्।
अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण ऋद्धम्।
एतत्तवमनुस्वरूपम्। गकारः पूर्वरूपम्।
अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यरूपम्।
बिन्दुरुत्तररूपम्। नादः सन्धानम्। सग्ंहिता सन्धिः॥ ९ ॥

*gaṇādiṁ pūrvamuccārya varṇādīṁstadanantaram,*
*anusvāraḥ parataraḥ, ardhendulasitam, tāreṇa*
*ṛddham, etattavamanusvarūpam, gakāraḥ*
*pūrvarūpam, akāro madhyamarūpam,*
*anusvāraścāntyarūpam, binduruttararūpam,*
*nādaḥ sandhānam, sagṁhitā sandhiḥ. (9)*



Shakti Vinayaka
Chinmaya Heritage Centre
Chennai

सैषा गणेशविद्या । गणक ऋषिः । निचृद्गायत्रीच्छन्दः ।
गणपतिर्देवता ॥ १० ॥

*saiṣā gaṇeśavidyā, gaṇaka ṛṣiḥ,*
*nicṛdgāyatrīcchandaḥ, gaṇpatirdevatā. (10)*

ॐ गं गणपतये नमः ॥ ११ ॥

*om gaṁ gaṇapataye namaḥ. (11)*

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥ १२ ॥

*ekadantāya vidmahe vakratuṇḍāya dhīmahi,*
*tanno dantiḥ pracodayāt. (12)*

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्। रदं च वरदं
हस्तैर्बिभ्राणं मूषकध्वजम्। रक्तं लम्बोदरं शूर्पकर्णकं
रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्।
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ १३ ॥

*ekadantaṁ caturhastaṁ pāśamaṅkuśadhāriṇam, radaṁ ca varadaṁ hastairbibhrāṇaṁ mūṣaka dhvajam, raktaṁ lambodaraṁ śūrpakarṇakaṁ raktavāsasam, raktagandhānuliptāṅgaṁ raktapuṣpaiḥ supūjitam, bhaktānukampinaṁ devaṁ jagatkāraṇamacyutam, āvirbhūtaṁ ca srṣṭyādau prkṛteḥ puruṣātparam, evaṁ dhyāyati yo nityaṁ sa yogī yogināṁ varaḥ. (13)*

नमो व्रातपतये। नमो गणपतये। नमः प्रमथपतये।
नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय
श्रीवरदमूर्तये नमः ॥ १४ ॥

*namo vrātapataye, namo gaṇapataye, namaḥ pramathapataye, namaste'stu lambodarāyaikadantāya vighnanāśine śivasutāya śrīvaradamūrtaye namaḥ. (14)*

एतदथर्वशीर्षं योऽधीते स ब्रह्मभूयाय कल्पते। स सर्वविघ्नैर्न
बाध्यते। स सर्वत्र सुखमेधते।
स पञ्चमहापापात् प्रमुच्यते॥ १५ ॥

*etadatharvaśīrṣaṁ yo'dhīte sa brahmabhūyāya kalpate, sa sarvavighnairna bādhyate, sa sarvatra sukhamedhate, sa pañcamahāpāpāt pramucyate. (15)*

सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति । सर्वत्राधीयानोऽपविघ्नो भवति ।धर्मार्थकाममोक्षं च विन्दति ॥ १६ ॥

*sāyamadhīyāno divasakṛtaṁ pāpaṁ nāśayati,*
*prātaradhīyāno rātrikṛtaṁ pāpaṁ nāśayati,*
*sāyaṁ prātaḥ prayuñjāno pāpo'pāpo bhavati,*
*sarvatrādhīyāno'pavighno bhavati,*
*dharmārthakāmamokṣaṁ ca vindati. (16)*

इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद् दास्यति स पापीयान् भवति ॥ १७ ॥

*idamatharvaśīrṣamaśiṣyāya na deyam, yo yadi*
*mohād dāsyati sa pāpīyān bhavati. (17)*

सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् ॥ १८ ॥

*sahasrāvartanādyaṁ yaṁ kāmamadhīte taṁ
tamanena sādhayet. (18)*

अनेन गणपतिमभिषिञ्चति स वाग्मी भवति ॥ १९ ॥

*anena gaṇapatimabhiṣiñcati sa vāgmī bhavati. (19)*

चतुर्थ्यामनश्नन् जपति स विद्यावान् भवति ॥ २० ॥

*caturthyāmanaśnan japati sa vidyāvān
bhavati. (20)*

इत्यथर्वणवाक्यम् ॥ २१ ॥

*ityatharvaṇavākyam. (21)*

ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ॥ २२ ॥

*brahmādyāvaraṇam vidyānna
bibheti kadācaneti. (22)*



Chinmaya Ganadhish
Toap Sambhapur
Kolhapur

यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति ॥ २३ ॥

*yo dūrvāṅkurairyajati sa*
*vaiśravaṇopamo bhavati. (23)*

यो लाजैर्यजति स यशोवान् भवति ।
स मेधावान् भवति ॥ २४ ॥

*yo lājairyajati sa yaśovān bhavati,*
*sa medhāvān bhavati. (24)*

यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति ॥ २५ ॥

*yo modakasahasreṇa yajati sa*
*vāñchitaphalamavāpnoti. (25)*

यः साज्यसमिद्भिर्यजति स सर्वं लभते ।
स सर्वं लभते ॥ २६ ॥

*yaḥ sājyasamidbhiryajati sa sarvaṁ labhate,*
*sa sarvaṁ labhate. (26)*

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा
सूर्यवर्चस्वी भवति ॥ २७ ॥

*aṣṭau brāhmaṇān samyag grāhayitvā*
*sūryavarcasvī bhavati. (27)*

सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो
भवति । महाविघ्नात् प्रमुच्यते । महादोषात् प्रमुच्यते ।
महाप्रत्यवायात् प्रमुच्यते ॥ २८ ॥

*sūryagrahe mahānadyāṁ pratimāsannidhau vā*
*japtvā siddhamantro bhavati, mahāvighnāt*
*pramucyate, mahādoṣāt pramucyate,*
*mahāpratyavāyāt pramucyate. (28)*

स सर्वविद्भवति । स सर्वविद्भवति । य एवं वेद ।
इत्युपनिषत् ॥ २९ ॥
ॐ शान्तिः शान्तिः शान्तिः ।

*sa sarvavidbhavati, sa sarvavidbhavati,*
*ya evaṁ veda, ityupaniṣat. (29)*
*om śāntiḥ śāntiḥ śāntiḥ.*



Mangala Vinayaka
Jakarta

# श्रीगणेश अष्टोत्तरशतनामावलिः

ॐ गजाननाय नमः ।

ॐ गणाध्यक्षाय नमः ।

ॐ विघ्नराजाय नमः ।

ॐ विनायकाय नमः ।

ॐ द्वैमातुराय नमः ।

ॐ सुमुखाय नमः ।

ॐ प्रमुखाय नमः ।

ॐ सन्मुखाय नमः ।

ॐ कृतिने नमः ।

ॐ ज्ञानदीपाय नमः । (१०)

ॐ सुखनिधये नमः ।

ॐ सुराध्यक्षाय नमः ।

ॐ सुरारिभिदे नमः ।

ॐ महागणपतये नमः ।

ॐ मान्याय नमः ।

ॐ महन्मान्याय नमः ।

ॐ मृडात्मजाय नमः।
ॐ पुराणाय नमः।
ॐ पुरुषाय नमः।
ॐ पूष्णे नमः। (२०)
ॐ पुष्करिणे नमः।
ॐ पुण्यकृते नमः।
ॐ अग्रगण्याय नमः।
ॐ अग्रपूज्याय नमः।
ॐ अग्रगामिने नमः।
ॐ मन्त्रकृते नमः।
ॐ चामीकरप्रभाय नमः।
ॐ सर्वस्मै नमः।
ॐ सर्वोपास्याय नमः।
ॐ सर्वकर्त्रे नमः। (३०)
ॐ सर्वनेत्रे नमः।
ॐ सर्वसिद्धिप्रदाय नमः।
ॐ सर्वसिद्धाय नमः।

ॐ सर्ववन्द्याय नमः।

ॐ महाकालाय नमः।

ॐ महाबलाय नमः।

ॐ हेरम्बाय नमः।

ॐ लम्बजठराय नमः।

ॐ ह्रस्वग्रीवाय नमः।

ॐ महोदराय नमः। (४०)

ॐ मदोत्कटाय नमः।

ॐ महावीराय नमः।

ॐ मन्त्रिणे नमः।

ॐ मङ्गळदाय नमः।

ॐ प्रमथाचार्याय नमः।

ॐ प्राज्ञाय नमः।

ॐ प्रमोदाय नमः।

ॐ मोदकप्रियाय नमः।

ॐ धृतिमते नमः।

ॐ मतिमते नमः। (५०)

ॐ कामिने नमः।
ॐ कपित्थप्रियाय नमः।
ॐ ब्रह्मचारिणे नमः।
ॐ ब्रह्मरूपिणे नमः।
ॐ ब्रह्मविदे नमः।
ॐ ब्रह्मवन्दिताय नमः।
ॐ जिष्णवे नमः।
ॐ विष्णुप्रियाय नमः।
ॐ भक्तजीविताय नमः।
ॐ जितमन्मथाय नमः। (६०)
ॐ ऐश्वर्यदाय नमः।
ॐ गुहज्यायसे नमः।
ॐ सिद्धसेविताय नमः।
ॐ विघ्नकर्त्रे नमः।
ॐ विघ्नहर्त्रे नमः।
ॐ विघ्ननेत्रे नमः।
ॐ विराजे नमः।
ॐ स्वराजे नमः।

ॐ श्रीपतये नमः।

ॐ वाक्पतये नमः। (७०)

ॐ श्रीमते नमः।

ॐ शृङ्गारिणे नमः।

ॐ श्रितवत्सलाय नमः।

ॐ शिवप्रियाय नमः।

ॐ शीघ्रकारिणे नमः।

ॐ शाश्वताय नमः।

ॐ शिवनन्दनाय नमः।

ॐ बलोद्धताय नमः।

ॐ भक्तनिधये नमः।

ॐ भावगम्याय नमः। (८०)

ॐ भावात्मजाय नमः।

ॐ महते नमः।

ॐ मङ्गळदायिने नमः।

ॐ महेशाय नमः।

ॐ महिताय नमः।

ॐ सत्यधर्मिणे नमः।

ॐ सदाधाराय नमः।

ॐ सत्याय नमः।

ॐ सत्यपराक्रमाय नमः।

ॐ शुभाङ्गाय नमः। (९०)

ॐ शुभ्रदन्ताय नमः।

ॐ शुभदाय नमः।

ॐ शुभविग्रहाय नमः।

ॐ पञ्चपातकनाशिने नमः।

ॐ पार्वतीप्रियनन्दनाय नमः।

ॐ विश्वेशाय नमः।

ॐ विबुधाराध्यपदाय नमः।

ॐ वीरवराग्रगाय नमः।

ॐ कुमारगुरुवन्द्याय नमः।

ॐ कुञ्जरासुरभञ्जनाय नमः। (१००)

ॐ वल्लभावल्लभाय नमः।

ॐ वराभय कराम्बुजाय नमः।

ॐ सुधाकलश हस्ताय नमः।

ॐ सुधाकर कलाधराय नमः।

ॐ पञ्चहस्ताय नमः।

ॐ प्रधानेशाय नमः।

ॐ पुरातनाय नमः।

ॐ वरसिद्धिविनायकाय नमः। (१०८)



Ananda Narthana Vinayaka
Coimbatore
Tamil Nadu

# *śrī gaṇeśa aṣṭottaraśatanāmāvaliḥ*

*om gajānanāya namaḥ*
*om gaṇādhyakṣāya namaḥ*
*om vighnarājāya namaḥ*
*om vināyakāya namaḥ*
*om dvaimāturāya namaḥ*
*om sumukhāya namaḥ*
*om pramukhāya namaḥ*
*om sanmukhāya namaḥ*
*om kṛtine namaḥ*
*om jñānadīpāya namaḥ (10)*
*om sukhanidhaye namaḥ*
*om surādhyakṣāya namaḥ*
*om surāribhide namaḥ*
*om mahāgaṇapataye namaḥ*
*om mānyāya namaḥ*
*om mahanmānyāya namaḥ*
*om mṛḍātmajāya namaḥ*
*om purāṇāya namaḥ*
*om puruṣāya namaḥ*
*om pūṣṇe namaḥ (20)*

*om puṣkariṇe namaḥ*
*om puṇyakṛte namaḥ*
*om agragaṇyāya namaḥ*
*om agrapūjyāya namaḥ*
*om agragāmine namaḥ*
*om mantrakṛte namaḥ*
*om cāmīkaraprabhāya namaḥ*
*om sarvasmai namaḥ*
*om sarvopāsyāya namaḥ*
*om sarvakartre namaḥ (30)*
*om sarvanetre namaḥ*
*om sarvasiddhipradāya namaḥ*
*om sarvasiddhāya namaḥ*
*om sarvavandyāya namaḥ*
*om mahākālāya namaḥ*
*om mahābalāya namaḥ*
*om herambāya namaḥ*
*om lambajaṭharāya namaḥ*
*om hrasvagrīvāya namaḥ*
*om mahodarāya namaḥ (40)*
*om madotkaṭāya namaḥ*
*om mahāvīrāya namaḥ*
*om mantriṇe namaḥ*
*om maṅgaḻadāya namaḥ*

*om pramathācāryāya namaḥ*
*om prājñāya namaḥ*
*om pramodāya namaḥ*
*om modakapriyāya namaḥ*
*om dhṛtimate namaḥ*
*om matimate namaḥ (50)*
*om kāmine namaḥ*
*om kapitthapriyāya namaḥ*
*om brahmacāriṇe namaḥ*
*om brahmrūpiṇe namaḥ*
*om brahmavide namaḥ*
*om brahmavanditāya namaḥ*
*om jiṣṇave namaḥ*
*om viṣṇupriyāya namaḥ*
*om bhaktajīvitāya namaḥ*
*om jitamanmathāya namaḥ (60)*
*om aiśvaryadāya namaḥ*
*om guhajyāyase namaḥ*
*om siddhasevitāya namaḥ*
*om vighnakartre namaḥ*
*om vighnahartre namaḥ*
*om vighnanetre namaḥ*
*om virāje namaḥ*
*om svarāje namaḥ*

*om śrīpataye namaḥ*
*om vākpataye namaḥ (70)*
*om śrīmate namaḥ*
*om śṛṅgāriṇe namaḥ*
*om śritavatsalāya namaḥ*
*om śivapriyāya namaḥ*
*om śīghrakāriṇe namaḥ*
*om śāśvatāya namaḥ*
*om śivanandanāya namaḥ*
*om baloddhatāya namaḥ*
*om bhaktanidhaye namaḥ*
*om bhāvagamyāya namaḥ (80)*
*om bhāvātmajāya namaḥ*
*om mahate namaḥ*
*om maṅgaḻadāyine namaḥ*
*om maheśāya namaḥ*
*om mahitāya namaḥ*
*om satyadharmiṇe namaḥ*
*om sadādhārāya namaḥ*
*om satyāya namaḥ*
*om satyaparākramāya namaḥ*
*om śubhāṅgāya namaḥ (90)*
*om śubhradantāya namaḥ*
*om śubhadāya namaḥ*

*om śubhavigrahāya namaḥ*
*om pañcapātakanāśine namaḥ*
*om pārvatīpriyanandanāya namaḥ*
*om viśveśāya namaḥ*
*om vibudhārādhyapadāya namaḥ*
*om vīravarāgragāya namaḥ*
*om kumāraguruvandyāya namaḥ*
*om kuñjarāsurabhañjanāya namaḥ (100)*
*om vallbhāvallabhāya namaḥ*
*om varābhaya karāmbujāya namaḥ*
*om sudhākalaśa hastāya namaḥ*
*om sudhākara kalādharāya namaḥ*
*om pañcahastāya namaḥ*
*om pradhāneśāya namaḥ*
*om purātanāya namaḥ*
*om varasiddhivināyakāya namaḥ (108)*



Mukthi Vinayaka
Chinmaya Tarangini
Chennai

ॐ

# श्रीप्रणव गणेश वैदिक आराधना

ॐ हरिः ॐ । श्रीगुरुभ्यो नमः । हरिः ॐ ।
बोलिये श्रीप्रणव गणेश भगवान की जय ।

ॐ देवदेवोत्तम देवतासार्वभौम अखिलाण्डकोटि
ब्रह्माण्डनायक श्रीप्रणव गणेश स्वामिने नमः ।
मन्त्रपुष्पाणि समर्पयामि । ॐ योऽपां पुष्पं वेद । पुष्पवान्
प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् ।
पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद ।
योऽपामायतनं वेद । आयतनवान् भवति ।

हरिः ॐ । स्वस्ति प्रजाभ्य परिपालयन्ताम् । न्याय्येन
मार्गेण महीं महीशाः ॥ गोब्राह्मणेभ्यः शुभमस्तु नित्यं ।
लोकाः समस्ताः सुखिनो भवन्तु ॥ काले वर्षतु पर्जन्यः
पृथिवी सस्यशालिनी ॥ देशोऽयं क्षोभरहितः ब्राह्मणास्सन्तु
निर्भयाः ॥ ॐ महद्भ्यो नमः । स्वामिनः । भवन्तस्सर्वे
शृण्वन्तु । स्वस्ति मन्त्रार्थाः सत्याः सफलाः सन्तु इति
महान्तोऽनुगृह्णन्तु । तथास्तु ।

अस्य देवदेवस्य अखिलाण्डकोटि ब्रह्माण्डनायकस्य
देवदेवोत्तमस्य देवतासार्वभौमस्य सकल निष्कल
स्वरूपस्य सर्वज्ञत्व सर्वेश्वरत्व सर्वान्तर्यामित्व
सर्वस्रष्टृत्व सर्वभोक्तृत्व सर्वसंहारकत्व सर्वव्यापकत्व
सर्वशक्तिमत्वादि गुणगण विभूषितस्य वेदान्तवेद्यस्य
पार्वतीपुत्रस्य मूषिकवाहनारूढस्य भक्तवत्सलस्य
मुनिजनसेवितस्य लोकानुग्रहकारकस्य भक्तानुग्रहवरदस्य
भगवतः श्रीप्रणव गणेश स्वामिनः नित्यपूजा अभिषेक
अलङ्कार नैवेद्य दीपाराधन कर्मणिमध्ये

यत् किञ्चित् मन्त्रलोपे तन्त्रलोपे क्रियालोपे
शक्तिलोपे श्रद्धालोपे काललोपे नियमलोपे
नैवेद्यादि विहितलोपे च यत् वैगुण्यं जातं
तत् सर्वं भगवद्कृपया यथाप्रोक्तं यथाशास्त्रानुष्ठितं
भगवद्प्रीतिकरं भूयादिति महान्तोऽनुगृह्णन्तु । तथास्तु ।

सर्वे जनाः सुखिनो भवन्तु । तथास्तु ।
सर्वं समस्तं सन्मंगलमस्तु । तथास्तु ।
अस्य धर्मस्य उत्तरोत्तराभिवृद्धिरस्तु । तथास्तु ।
राजा धार्मिको विजयी भवतु । तथास्तु ।
देशोऽयं निरुपद्रवोऽस्तु । तथास्तु ।
सत्या एता आशिषः सन्तु । तथास्तु ।

ॐ सुमुखाय नमः।
ॐ कपिलाय नमः।
ॐ लम्बोदराय नमः।
ॐ विघ्नराजाय नमः।
ॐ धूमकेतवे नमः।
ॐ भालचन्द्राय नमः।
ॐ वक्रतुण्डाय नमः।
ॐ हेरम्बाय नमः।
ॐ सिद्धिविनायकाय नमः।

ॐ एकदन्ताय नमः।
ॐ गजकर्णकाय नमः।
ॐ विकटाय नमः।
ॐ विनायकाय नमः।
ॐ गणाध्यक्षाय नमः।
ॐ गजाननाय नमः।
ॐ शूर्पकर्णाय नमः।
ॐ स्कन्दपूर्वजाय नमः।
ॐ प्रणवगणेशस्वामिने नमः।

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि
तन्नो दन्तिः प्रचोदयात्॥

ॐ गणानां त्वा गणपतिगूं हवामहे कविं
कविनामुपमश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः
शृण्वन्नूतिभिस्सीद सादनम्॥

ॐ राजाधिराजाय प्रसह्यसाहिने नमो वयं
वैश्रवणाय कुर्महे । स मे कामान् कामकामाय
मह्यं कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय महाराजाय नमः ।
ॐ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति ।
वेदान्तविज्ञान सुनिश्चितार्थाः
सन्न्यासयोगाद्यतयः शुद्धसत्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ।
दहं विपापं परमेऽश्मभूतं यत्पुण्डरीकं पुरमध्यसँस्थम् ।
तत्रापि दहं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम् ।
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृति लीनस्य यः परः स महेश्वरः ॥
ॐ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा
विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥
बोलिये श्रीप्रणव गणेश भगवान की जय ।



Chinmaya Ganapati
Minneapolis
USA

# om

## *śrīpraṇava gaṇeśa vaidika ārādhanā*

*om hariḥ om, śrī gurubhyo namaḥ, hariḥ om,*
*boliye śrīpraṇava gaṇeśa bhagavāna kī….* ***jaya***

*om devadevottama devatāsārvabhauma*
*akhilāṇḍakoṭi brahmāṇḍanāyaka*
*śrīpraṇava gaṇeśa svāmine nama,*
*mantrapuṣpāṇi samarpayāmi,*
*om yo'pāṁ puṣpaṁ veda,*
***puṣpavān prajāvān paśumān bhavati,***
*candramā vā apāṁ puṣpam,*
***puṣpavān prajāvān paśumān bhavati,***
*ya evaṁ veda,* ***yo'pāmāyatanaṁ veda,***
*āyatanavān bhavati.*

***hariḥ om, svasti prajābhyaḥ paripālayantāṁ***
***nyāyyena mārgeṇa mahīṁ mahīśāḥ,***
***gobrāhmaṇebhyaḥ śubhamastu nityaṁ,***
***lokāḥ samastāḥ sukhino bhavantu,***
***kāle varṣatu parjanyaḥ pṛthivī sasyaśālinī,***
***deśoyaṁ kṣobharahitaḥ brāhmaṇāḥ santu***
***nirbhayāḥ.***

*om mahadbhyo namaḥ, svāminaḥ, bhavantaḥ sarve*
*śṛṇvantu, svasti mantrārthāḥ satyāḥ saphalāḥ*
*santu iti mahānto'nugṛhṇantu,* ***tathāstu***

*asya devadevasya akhilāṇḍakoṭi*
*brahmāṇḍanāyakasya devadevottamasya*
*devatāsārvabhaumasya sakala niṣkala svarūpasya*
*sarvajñatva sarveśvaratva sarvāntaryāmitva*
*sarvasraṣṛṣtva sarvabhoktṛtva sarvasaṁhārakatva*
*sarvavyāpakatva sarvaśaktimatvādi guṇagaṇa*
*vibhūṣitasya vedāntavedyasya pārvatīputrasya*
*mūṣika vāhanārūḍhasya bhaktavatsalasya*
*munijanasevitasya lokānugrahakārakasya*
*bhaktānugrahavaradasya bhagavataḥ śrī praṇava*
*gaṇeśa svāminaḥ nityapūjā abhiṣeka alaṅkāra*
*naivedya dīpārādhana karmaṇimadhye*

*yat kiñcit mantralope tantralope kriyālope śaktilope śraddhālope kālalope niyamalope naivedyādi vihitalope ca yat vaiguṇyaṁ jātaṁ tat sarvaṁ bhagavatkṛpayā yathāproktaṁ yathāśāstrānuṣṭhitaṁ bhagavatprītikaraṁ bhūyāditi mahānto'nugṛhṇantu,* ***tathāstu***

*sarve janāḥ sukhino bhavantu,* ***tathāstu***
*sarvaṁ samastaṁ sanmaṅgalamastu,* ***tathāstu***
*asya dharmasya uttarottarābhivṛddhirastu,* ***tathāstu***
*rājā dhārmiko vijayī bhavatu,* ***tathāstu***
*deśo'yaṁ nirupadravo'stu,* ***tathāstu***
*satyā etā āśiṣaḥ santu,* ***tathāstu***

*om sumukhāya namaḥ*
*om kapilāya namaḥ*
*om lambodarāya namaḥ*
*om vighnarājāya namaḥ*
*om dhūmaketave namaḥ*
*om bhālacandrāya namaḥ*
*om vakratuṇḍāya namaḥ*
*om herambāya namaḥ*
*om siddhivināyakāya namaḥ*

***om ekadantāya namaḥ***
***om gajakarṇakāya namaḥ***
***om vikaṭāya namaḥ***
***om vināyakāya namaḥ***
***om gaṇādhyakṣāya namaḥ***
***om gajānanāya namaḥ***
***om śūrpakarṇāya namaḥ***
***om skandapūrvajāya namaḥ***
***om praṇavagaṇeśasvāmine namaḥ***

*om ekadantāya vidmahe vakratuṇḍāya dhīmahi*
**tanno dantiḥ pracodayāt.**

***om gaṇānāṁ tvā gaṇapatigṁ havāmahe kaviṁ***
***kavīnāmupamaśravastamam,***
***jyeṣṭharājaṁ brahmaṇāṁ brahmaṇaspata ā naḥ***
***śṛṇvannūtibhissīda sādanam.***

***om rājādhirājāya prasahyasāhine namo vayaṁ vaiśravaṇāya kurmahe, sa me kāmān kāmakāmāya mahyaṁ kāmeśvaro vaiśravaṇo dadātu, kuberāya vaiśravaṇāya mahārājāya namaḥ.***

***om na karmaṇā na prajayā dhanena tyāgenaike amṛtatvamānaśuḥ, pareṇa nākaṁ nihitaṁ guhāyāṁ vibhrājadetadyatayo viśanti, vedāntavijñāna suniścitārthāḥ sannyāsayogādyatayaḥ śuddhasatvāḥ, te brahmaloke tu parāntakāle parāmṛtātparimucyanti sarve, dahraṁ vipāpaṁ parameśmabhūtaṁ yatpuṇḍarīkaṁ puramadhyasaṁgastham, tatrāpi dahraṁ gaganaṁ viśokastasmin yadantastadupāsitavyam.***

***yo vedādau svaraḥ prokto vedānte ca pratiṣṭhitaḥ, tasya prakṛti līnasya yaḥ paraḥ sa maheśvaraḥ.***

***om na tatra sūryo bhāti na candratārakaṁ nemā vidyuto bhānti kutoyamagniḥ, tameva bhāntamanubhāti sarvaṁ tasya bhāsā sarvamidaṁ vibhāti.***

*boliye śrīpraṇava gaṇeśa bhagavāna kī….**jaya.***



Chinmaya Ganapati
Kolar
Karnataka

# आरती
## *ārati*

सुखकर्ता दुखहर्ता वार्ता विघ्नाची ।
नुरवी पुरवी प्रेम कृपा जयाची ।
सर्वांगि सुंदर उटि शेंदुराची ।
कंठि झळके माळ मुक्ताफळांची ॥ १ ॥
जय देव जय देव जय मंगलमूर्ती ।
दर्शनमात्रें मनकामना पूरती ॥ ध्र ॥
रत्नखचित फरा तुज गौरीकुमरा ।
चन्दनाचि उटी कुंकुमकेशरा ।
हिरेजडित मुकुट शोभतो बरा ।
रुणझुणती नूपुरें चरणी घागरिया ॥ जय ॥ २ ॥

लम्बोदर पितांबर फणिवरवंधना।
सरळ सोण्ड वक्रतुण्ड त्रिनयना।
दास रामाचा वाट पाहे सदना।
संकटि पावावे निर्वाणी रक्षावें सुरवर वंदना॥ ३॥
जय देव जय देव जय मंगलमूर्ती।
दर्शनमात्रें मनकामना पूरती॥

*sukhakartā dukhahartā vārtā vighnācī,*
*nuravī puravī prema kṛpā jayācī,*
*sarvāṅgi sundara uṭi śendurācī,*
*kaṇṭhi jhaḻake māḻa muktāphaḻāñcī. (1)*

*jaya deva jaya deva jaya maṅgalamūrtī,*
*darśanamātreṁ manakāmanā pūratī. (ghra)*

*ratnakhacita pharā tuja gaurīkumarā,*
*candanāci uṭī kuṅkumakeśarā,*
*hirejaḍita mukuṭa śobhato barā,*
*ruṇajhuṇatī nūpureṁ caraṇī ghāgariyā,*
*jaya. (2)*

*lambodara pitāmbara phaṇivaravandhanā,*
*saraḷa soṇḍa vakratuṇḍa trinayanā,*
*dāsa rāmācā vāṭa pāhe sadanā,*
*saṅkaṭi pāvāve nirvāṇī rakṣāveṁ suravara vandanā. (3)*
*jaya deva jaya deva jaya maṅgalamūrtī,*
*darśanamātreṁ manakāmanā pūratī.*



Jnana Vinayakar
Kothagiri
Tamil Nadu



Varada Ganapati
Kottayam
Kerala

# आरती

## *āratī*

*Composed by*
*Swami Tejomayananda*

आरती श्रीमङ्गलगणपति की ।
विघ्नविनायक प्रणवस्वरूप की ॥

*āratī śrīmaṅgalagaṇapati kī,*
*vighnavināyaka praṇavasvarūpa kī.*

शंकरसुवन भवानीनन्दन ।
मूषकवाहन गज आनन की ॥ १ ॥

*śaṅkarasuvana bhavānīnandana,*
*mūṣakavāhana gaja ānana kī. (1)*

पाशाङ्कुशधर वरदहस्तकी ।
ग्यानप्रेमरसमोदककरकी ॥ २ ॥

*pāśāṅkuśadhara varadahasta kī,*
*gyānapremarasamodakakarakī.* (2)

एकदन्त प्रभु विनय हमारी ।
देहु भगति नित तव चरननकी ॥ ३ ॥

*ekadanta prabhu vinaya hamārī,*
*dehu bhagati nita tava carananakī.* (3)